एकेनैव कृतार्थः स्यात् बहुभिः किमु सुव्रत ॥”
इति हेमाद्रिधृतलक्षणकाण्डम् ॥ * ॥
“उत्ताङ्कं श्रेयसे योग्यं शीर्षमन्त्रं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा कमण्डलुम् ॥
दण्डाङ्कं सूत्रचिह्नं वा ब्रह्मस्थानान्वितं मतम् ।
शशिवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम् ॥
वसुदैः सेन्द्रयक्षेशं गुह्यकैर्यातुधानकैः ।
नानावर्णमयं नीलं शशाङ्कमण्डलप्रभम् ॥”
इति वीरमित्रोदयधृतकालोत्तरः ॥
इति बाणलिङ्गलक्षणम् ॥ * ॥
अथ तस्य परीक्षा ।
“इत्येतल्लक्षणं प्रोक्तं परीक्षा तत्त्वकोविदैः ।
त्रिः सप्त पञ्च वारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥”
इति वीरमित्रोदयधृतम् ॥
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला यद्यधिकाः स्युस्तदा तल्लिङ्गं गृहिणां पूज्यमवधार्य्यं लिङ्गञ्चेदधिकं तदोदासीनपूज्यन्तदिति किं वदन्तीति हेमाद्रिधृतलक्षणकाण्डम् ॥
“सप्तकृत्वस्तुलारूढं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं शेषं नार्म्मदमुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥”
इति सूतसंहिता ॥
“नद्यां वा प्रक्षिपेद्भूयाद्यदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि नूनं सुखविवर्द्धनम् ॥”
इति वीरमित्रोदयः ॥ * ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
“अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ॥
तेन यस्मै कृतं तस्मात् बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुण्डलस्य समाकृति ॥
भुक्तिमुक्तिप्रदञ्चैव बाणलिङ्गमुदाहृतम् ॥”
पङ्कजफलं पद्मबीजम् ।
“पक्वजम्बुफलाकारं कुक्कुटाण्डसमाकृति ।”
इति हेमाद्रिधृतलक्षणकाण्डे पाठः ॥ * ॥
देवीं प्रति शिववाक्यम् ।
“प्रशस्तं नार्म्मदं लिङ्गं पक्वजम्बुफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संस्रवते लिङ्गं गिरितो नर्म्मदाजले ॥
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
आविरासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात् ॥”

तथा,—
“ताम्री वा स्फाटिकी स्वर्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥” * ॥
प्रत्यहं योऽर्च्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥”
इति प्रत्यहबाणलिङ्गपूजायाः फलम् । इति याज्ञवल्क्यसंहिता ॥ * ॥
“संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे तु अणिमाद्याः सुसंस्थिताः ॥”
इति सूतसंहिता ॥ * ॥
“रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥”
इति बाणलिङ्गप्रशंसा । इति केदारखण्डम् ॥ * ॥
निन्द्यलिङ्गमाह तत्रैव ।
“कर्कशे बाणलिङ्गे तु पुत्त्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते धेनुपुत्त्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिर्म्मरणमेव च ॥
छिद्रलिङ्गेऽर्च्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतिं विलाग्रे तु गोधनानां क्षयो भवेत् ॥ *
तीक्ष्णाग्रं वक्रशीर्षञ्च त्र्यस्रलिङ्गं विवर्जयेत् ।
अतिस्थूलञ्चातिकृशं स्वल्पं वा भूषणान्वितम् ।
गृही विवर्ज्जयेत्तादृक् तद्धि मोक्षार्थिनो हितम् ॥”
इति दुष्टबाणलिङ्गलक्षणम् । इति हेमाद्रिः ॥ * ॥
शुभलिङ्गमाह ।
“अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणः ।
लघु वा कपिलं स्थूलं गृही नैवार्च्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ।
तत् सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रासादपीठगम् ॥”
इति शुभबाणलिङ्गलक्षणम् । इति वीरमित्रोदयः ॥ * ॥ बाणलिङ्गेष्वावाहनादि न कर्त्तव्यं यथा,—
“बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥”
इति भविष्यपुराणम् ॥
“ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥”
इति योगसारे ५ परिच्छेदः ॥ * ॥
अथ बाणलिङ्गध्यानम् ।
“ओँ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।

कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ।
प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ॥
तदिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ।
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥” * ॥
अथ स्तवः ।
“बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो
नमस्ते चोग्ररूपाय नमस्तेऽव्यक्तयोनये ॥
संसारकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
बाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
मुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ऐं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां निग्रहाय च ॥
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सर्व्वाय शिवाय निर्गुणाय च ॥ * ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ।
यः पठेत् साधकश्रेष्ठो गाणपत्यं लभेत सः ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ॥
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ॥
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ।
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
बाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां शत्रुनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥”
इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिवसंवादे बाणलिङ्गस्तोत्रं समाप्तम् ॥ * ॥
अथ रौद्रलिङ्गलक्षणम् ।
“नदीषसद्भवं रौद्रमन्योन्यस्य विपर्ययात् ।